# निरुक्ते निपातार्थविचारः

**नीलकमलपण्डितः**
सहायकाचार्यः, दरङ्गहाविद्यालयः,तेजपुरम्
Email: nilkamalpandit71@gmail.com

**शोधसारः**

अखिलभूमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागतग्रन्थेषु वेदास्सन्ति सर्वप्राचीनाः अपौरुषेयाभिधेयाः भारतीयसंस्कृतेराधाराश्च।वेदानां यथार्थतत्त्वज्ञानमत्यन्तं दुरूहं दुष्करञ्च वर्तते । तदर्थमेव वेदमर्मज्ञैः वेदात्मभूतयथार्थतत्त्वविद्भिः अपौरुषेयवाक्याभिधेयानां वेदानां याथार्थ्यं अवगन्तुमेव कानिचनाङ्गानि ऋषिभिर्दृष्टानि वर्तन्ते। तान्येव वेदाङ्गानीत्युच्यन्ते। वेदोपकारकभूतानि वेदाङ्गानि विद्यन्ते षट् । यथा- शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषञ्च । षड्विधवेदाङ्गेषु निरुक्तमन्यतमं वर्तते । यद्यपि निरुक्तस्य मुख्यविषयो वेदगतपदनिर्वचनमर्थप्रतिपादनञ्च तथाप्यत्र व्याकरणसम्बन्धिनो नैके विषयाः निरूपितास्सन्ति । तत्र निरुक्तग्रन्थस्य प्रथमकाण्डस्य प्रथमाध्याये निघण्ट्वाख्यसमाम्नायार्थनिरूपणावसरे यास्काचार्येण नाम-आख्यात-उपसर्ग-निपातानां स्वरूपं विवेचितम् । शोधपत्रेऽस्मिन् निरुक्तकारयास्काचार्येण प्रतिपादितं निपातस्वरूपं यथाशास्त्रं प्रतिपाद्यते।

**कूटशब्दाः**-वेदाङ्गम्, निरुक्तम्, निपातः।